# केंद्रीय विद्यालय संगठन,अहमदाबाद संभाग

## Kendriya Vidyalaya Sangathan, Ahmedabad Region

## कक्षा दसवीं प्रीबोर्ड- II परीक्षा 2025-26

## Pre Board II Examination 2025-26 for Class X

**SUBJECT : संस्कृतम् (122) M.M. : 80 TIME : त्रिहोरा पर्यन्तम्**

---

**सामान्यनिर्देश/GENERAL INSTRUCTIONS:**

1.समस्ताः प्रश्नाः अनिवार्या: सन्ति |

2.अस्मिन् प्रश्नपत्रे 18 प्रश्ना: सन्ति |

3.प्रश्नपत्रे चत्वारः खण्डाः सन्ति |

खण्ड: (क) अपठित-अवबोधनम् - 10 अंका:

खण्ड: (ख) रचनात्मक-कार्यम् - 15 अंका:

खण्ड: (ग) अनुप्रयुक्त-व्याकरणम् - 25 अंका:

खण्ड: (घ) पठित-अवबोधनम् - 30 अंका:

4.उत्तराणि पृथक् उत्तरपुस्तिकायां लिखत |

5.उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमांक: अवश्यं लेखनीय: |

6.निर्देशानुसारं प्रत्येकं प्रश्नानां उत्तराणि लिखत |

7.सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनियानि |

8.प्रश्नानां निर्देशा: ध्यानेन अवश्यं पठनीया |

### खण्ड: (क) अपठित-अवबोधनम् - 10 अंका:

1 निम्नलिखितं गद्याशं पठित्वा प्रश्नानाम् उत्तराणि लिखत -

अस्मिन् संसारे सज्जनाः दुर्जनाः च इति द्विधाः जनाः वसन्ति। सज्जनाः स्वाचरणेन सर्वान् जनान् प्रीणयन्ति। सत्पुरुषाः हंसतुल्याः भवन्ति, यथा हंसः संसारे दुग्धं गृहणाति जलम् च त्यजति, तथैव सज्जनाः अपि गुणान् गृहीत्वा दुर्गुणान् परित्यजन्ति। सत्पुरुषाणां हृदयेषु सर्वान् प्रति स्नेहः, दया, सहानुभूतिः, सहयोगभावः च भवन्ति। दुर्जनाः तु सर्वत्र विपरीतम् आचरन्ति। अस्माकम् शास्त्रेषु सज्जनानां प्रशंसा दुष्टानां च निन्दा कृता। वयं सदा सज्जनानां मार्गम् अनुसरेम।

अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) 1x2=2

(i) स्वाचरणेन जनान् के प्रीणयन्ति ?

(ii) संसारे कति विधाः जनाः वसन्ति ?

(iii) विपरीतम् आचरणम् के कुर्वन्ति ?

आ. पूर्णवाक्येन उत्तरत -(केवलं प्रश्नद्वयम्) 2x2=4

(i) सत्पुरुषाः हंसतुल्याः कथं भवन्ति ?

(ii) सज्जानानां हृदयेषु सर्वान् प्रति किं किं भवन्ति?

(iii) शास्त्रेषु केषां प्रशंसा कृता?

इ. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत - 1X1=1

ई. भाषिक कार्यम् (केवलं प्रश्नत्रयम्) 1X3=3

(i) 'परित्यजन्ति' इति क्रियापदस्य कर्तृपदम् किम्?

(अ)दुर्जनाः (ब)सज्जनाः (स) वयं

(ii) 'सर्वान्' पदस्य विशेष्यपदं किमस्ति?

(अ)जनान् (ब) गुणान् (स) दुर्गुणान्

(iii) 'प्रशंसा' पदस्य विलोमपदम् अत्र किम् प्रयुक्तम्?

(अ)दुर्जनाः (ब)निन्दा (स) दयां

(iv) वयं सदा सज्जनानां मार्गम् अनुसरेम।'अस्मिन् वाक्ये अव्यय पदम् किम् ?

(अ) वयं (ब) सदा (स) मार्गम्

**खण्ड: (ख) रचनात्मक-कार्यम् - 15 अंका:**

2 **भवतः नाम अक्षयः अस्ति छात्रावासे च भवान् वसति। अजन्ता-एलोरा-गुहासु शैक्षिकयात्रायै गन्तुम् इच्छति। धनप्रेषणार्थं पितरं प्रति लिखितं पत्रम् उचितशब्दैः पूरयत।** ½x10=5

24, विवेकान्द छात्रावासः

(i)................

परमादरणीयाः. (ii)..............

सादरं प्रणमामि !

सविनयं निवेदयामि यत् मम (iii)...........परीक्षा समाप्ता जाता। मम (iv).... अतीव शोभनानि अभवन्। अस्मिन् शरदावकाशे अहं गृहं न आगमिष्यामि, यतः विद्यालयेन एकस्याः (v).............. प्रबन्धः कृतः । एषा यात्रा अजन्ता-एलोरा-(vi).................दर्शनाय आयोजिता अस्ति । यात्राव्ययार्थम् (vii).............. रूप्यकाणि आवश्यकता अस्ति। कृपया शीघ्रमेव (viii)................ प्रेषयित्वा अनुगृह्णातु।अन्यत् सर्वं कुशलम् अस्ति। मम जनन्यै अग्रजाय च(ix)......................

भवदीयः (x)..................

अक्षय:

मंजूषा:- [ रुप्यकाणि, प्रियः पुत्रः, पञ्चशतम्, शैक्षिकयात्रायाः, उत्तरपत्राणि, सादरं प्रणामाः , त्रैमासिकी, कोलकातातः, गुहानाम्, पितृमहाभागाः ]

3. चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृते लिखत - 1x5=5



मञ्जूषा:- [ उद्यानस्य, मित्रैः, चत्वारः, पादकन्दुकेन, धावति, एका, बालिका, बालकाः, क्रीडन्ति, रज्ज्वा, वृक्षा: ]

4. अधोलिखितवाक्यानां संस्कृतभाषायाम् अनुवादं कुरुत- (केवलं वाक्यपञ्चकम्) 1x5=5

(i) बसंत सभी ऋतुओं में श्रेष्ठ है |

(ii) बच्चें गेंद से खेलते हैं |

(iii) भारतीय संस्कृति विश्व में प्रसिद्ध हैं |

(iv) हम सब पुस्तकालय से पुस्तक लाते हैं |

(v) मैं कल विद्यालय गया था |

(vi) हम सब कल घूमने के लिए जायेंगे |

**खण्ड: (ग) अनुप्रयुक्त-व्याकरणम् - 25 अंका:**

5. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं-सन्धिच्छेदं वा कुरुत। (केवलं प्रश्नचतुष्टयम्) 1x4=4

(i) जगत्पिता **जगदीशः** अस्ति ।

(ii) आलस्यं हि मनुष्याणां **शरीरस्थः + महान्** रिपुः।

(iii) **वयसस्तु** न किञ्चित् अन्तरम् |

(iv) **निर्बल:** किमपि कर्तुं न शक्नोति |

(v) नास्ति **किञ्चित् + निरर्थकम्** विचित्रे संसारे |

6 अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्य: चित्वा लिखत ।(केवलं प्रश्नचतुष्टयम्) 1x4=4

(i) धन्या **राजसेवकाः** ये तं रक्षन्ति।

(क) राजःसेवकः (ख) राज्ञासेवकाः (ग), राज्ञः सेवकाः

(ii) बुद्धिमती पुत्रद्वयोपेता **पितुर्गृहं** प्रति चलिता |

(क) पिता गृहम् (ख) पितरम् गृहम् (ग) पितु: गृहम्

(iii) प्रकृतिमाता **सस्नेहम्** वदति |

(क) स्नेहाय सहितम् (ख) स्नेहात् सहितम् (ग) स्नेहेन सहितम्

(iv) भिक्षुकः **प्रत्येकं** गृहं गच्छति ।

(क) एकम् एकं प्रति (ख) एकं एकं (ग) एकम् एकं यथा

(v) **विमूढधी:** अपक्वं फलं खादति |

(क) विमूढ: धी: यस्य स: (ख) विमूढा धी: यस्य स: (ग) विमूढा धी:

7 रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्य: चित्वा लिखत ।(केवलं प्रश्नचतुष्टयम्) 1x4=4

(i) महात्मान: **समत्वम्** इति आहु: |

(क) सम + त्वं (ख) सम + त्व (ग) सम + तल्

(ii) भुवनेश्वरस्य **ऐतिहासिकानां** स्थलानां विषये ज्ञातुम् वयम् उत्सुका । :

(क) ऐतिहास ठक्+ (ख) इतिहास मतुप्+ (ग) इतिहास ठक्+

(iii) व्याघ्रमारी **भयंकरा** अस्ति |

(क) भयंकर + टाप् (ख) भयंकर + ङीप् (ग) भयंकर + तल्

(iv) मानवस्य हृदि **सहिष्णु तल+** स्यात् ।

(क) सहिष्णुताम् (ख) सहिष्णुतया (ग) सहिष्णुता

(v) **छाया + मतुप्** वृक्षा: पथिकेभ्य: आश्रयं यच्छन्ति |

(क) छायावन्त: (ख) छायावान् (ग) छायामन्त:

8 वाच्यानुसारम् उचितपदै: रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुन: लिखत- 1x3=3

सुरेश: - मालति! किम् अतिथय: भोजनं कुर्वन्ति ?

मालती - आम् भ्रात:! अतिथिभि: भोजनं (i) --------- | [ करोमि , क्रियते , करोति ]

सुरेश: - मालति! किं जनक: अपि तत्र उपविशति ?

मालती - भ्रात:! (ii) ---------- तत्र न उपविश्यते | [ जनक: , जनकेन , जनकस्य ]

सुरेश: - मालति! किं माता फलानि आनयति ?

मालती - आम् , मात्रा (iii) --------- आनीयन्ते | [ फलम् , फलानि, फले ]

अथवा

अधोलिखितानां वाक्यानां वाच्यपरिवर्तनं कुरुत ।

(क) माता भोजनं पचति ।

(ख) बालक: हसति ।

(ग) छात्रेण पाठ: पठ्यते ।

9 अङ्कानांस्थाने संस्कृतपदैः समयं लिखित्वा वाक्यानि पुनःलिखत।(केवलं प्रश्नचतुष्टयम्) 1x4=4

(i) छात्र: 7:00 ------- वादने विद्यालयं गच्छति |

(ii) विद्यालये 7:30 -------- वादने प्रार्थनां करोति |

(iii) 9:15 -------- वादने क्रीडाकालांशे मित्रै: सह खेलति |

(iv) विद्यालयात् 12:45 ------- वादने गृहम् आगच्छति |

(v) छात्र: रात्रौ 10:00 --------- वादने स्वपिति |

10 मञ्जूषायां प्रदत्तै: उचितै: अव्ययपदै: अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत- 1x3=3

(i) ---------एक अकरोत् :वने तप :मुनि :|

(ii) मम मित्रै जन्तुशालां दृष्टुं गच्छामि ------- सह अहम् :|

(iii) कदापि भ्रमणं न कर्त्तव्यम् :इतस्तत ---------|

मञ्जूषा:- [ वृथा , अपि , पुरा ]

11 अधोलिखितेषु वाक्येषु रेखांकित अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुन: लिखत- 1x3=3
(केवलं प्रश्नत्रयम्)

(i) भवान् सुखी **<u>भवन्तु</u>** |

(क) भवन्तौ (ख) भवता (ग) भवतु

(ii) ते श्व: विद्यालयं **<u>गच्छन्ति</u>**|

(कअगच्छन् ( (खगमिष्यन्ति ( (गगच्छन्तु (

(iii) <u>वयं</u> प्रतिदिनं मातापितरौ प्रणमामि |

(क) अहम् (ख) त्वम् (ग) युवाम्

(iv) चिकित्सक: **<u>रुग्णान्</u>** औषधं ददाति |

(क:रुग्णेभ्य ( (खरुग्णम् ( (गरुग्णात् (

**खण्ड: (घ) पठित-अवबोधनम् - 30 अंका:**

12 अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानानां उत्तराणि संस्कृतेन लिखत-

बहून्यपत्यानि मे सन्तीति सत्यम्। तथाप्यहमेतस्मिन् पुत्रे विशिष्य आत्मवेदनामनुभवामि। यतो हि अयमन्येभ्यो दुर्बलः। सर्वेष्यपत्येषु जननी तुल्यवत्सला एव ।तथापि दुर्बले सुते मातुः अभ्यधिका कृपा सहजैव" इति ।सुरभिवचनं श्रुत्वा भृशं विस्मितस्याखण्डलस्यापि हृदयमद्रवत्। सः च तामेवमसान्त्वयत्-" गच्छ वत्से सर्वं भद्रं जायेत।"अचिरादेव चण्डवातेन मेघरवैश्च सह प्रवर्षः समजायत। लोकानां पश्यताम् एव सर्वत्र जलोपप्लवः सञ्जातः। कृषकः हर्षातिरेकेण कर्षणाविमुखः सन् वृषभौ नीत्वा गृहमगात्।

अ. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) 1/2x2=1

(i) सर्वेष्वपत्येषु जननी कीदृशी भवति?

(ii) कुत्र जलोपप्लवः सञ्जातः?

(iii) आखण्डलानुसरेण सुरभेः सर्वं किं जायेत?

आ. पूर्णवाक्येन उत्तरत-(केवलं प्रश्नद्वयम्) 1X2=2

(i) कस्य वचनं श्रुत्वा भृशं विस्मितस्याखण्डलस्यापि हृदयमद्रवत्?

(ii) आखण्डलः सुरभिं कथम् असान्त्वयत्?

(iii) दुर्बले सुते कस्याअभ्यधिका : कृपा सहजैव भवति?

इ. भाषिक-कार्यम् (केवलं प्रश्नद्वयम्) 1X2=2

(i) 'जनक:' इति पदस्य विपर्ययपदं किम् ?

(ii) 'शीघ्रम्' इति पदस्य पर्यायपदं किम् प्रयुक्तम्?

(iii) 'एतस्मिन् पुत्रे' अत्र विशेषणपदं किम् अस्ति ?

13 अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत-

"क्रोधो हि शत्रुः प्रथमो नराणां,देहस्थितो देहविनाशनाय ।
यथास्थितः काष्ठगतो हि वह्निः,सा एव वह्निर्दहते शरीरम् ।"

अ. एकपदेन उत्तरत-(केवलं प्रश्नद्वयम्) 1/2x2=1

(i) नराणां प्रथमः शत्रुः कः ?

(ii) केषां प्रथम: शत्रु: क्रोध: अस्ति ?

(iii) वह्नि: कुत्र स्थित: अस्ति ?

आ. पूर्णवाक्येन उत्तरत-(केवलं प्रश्नद्वयम्) 1X2=2

(i) कीदृशो अग्निः शरीराणि दहति ?

(ii) क्रोधः नराणां कोऽस्ति ?

(iii) क्रोधः किमर्थं देहस्थितोऽस्ति ?

इ. भाषिक-कार्यम् (केवलं प्रश्नद्वयम्) 1X2=2

(i) 'प्रथम: शत्रु:' इत्यनयो: पदयो: विशेषणपदं किम् ?

(ii) 'देहम्' इति पदस्य पर्यायपदं श्लोके किं लिखितम् ?

(iii) 'सा एव वह्निर्दहते शरीरम्।' अस्मिन् वाक्ये क्रियापदं किम् ?

14 अधोलिखितं नाट्यांशं पठित्वा प्रश्नानां उत्तराणि लिखत-

सिंह: - (क्रोधेन गर्जन् ) भो:! अहं वनराज: किं भयं न जायते ? किमर्थं मामेवं तुदन्ति सर्वे मिलित्वा ?

एक: वानर: - यत: त्वं वनराज: भवितुं तु सर्वथा अयोग्य: | राजा तु रक्षक: भवति परं भवान् तु भक्षक: | अपि च स्वरक्षायामपि समर्थ: नासि तर्हि कथमस्मान् रक्षिष्यसि ?

काक: - आम् सत्यं कथितं त्वया-वस्तुत: वनराज: भवितुं तु अहमेव योग्य: |

पिक: - (उपहसन्) कथं त्वं योग्य: वनराज: भवितुं, यत्र तत्र का-का इति कर्कशध्वनिना वातावरणमाकुली करोषि | न रूपम्, न ध्वनिरस्ति | कृष्णवर्णम् मेध्यामेध्यभक्षकं त्वां कथं वनराजं मन्यामहे वयम् |

अ. एकपदेन उत्तरत-(केवलं प्रश्नद्वयम्) 1/2x2=1

(i) कर्कशध्वनिना वातावरणमाकुली क: करोति ?

(ii) सिंह: कस्याम् अपि समर्थ: न अस्ति ?

(iii) काक: केन ध्वनिना वातावरणमाकुली करोति ?

आ. पूर्णवाक्येन उत्तरत-(केवलं प्रश्नद्वयम्) 1X2=2

(i) सिंह: किम् अवदत् ?

(ii) एकः वानरः किं वदति ?

(iii) कृष्णवर्ण: मेध्यामेध्यभक्षक: क: अस्ति ?

इ. भाषिक-कार्यम् (केवलं प्रश्नद्वयम्) 1X2=2

(i) 'रक्षकः' इत्यस्य किं विलोमपदं अत्र प्रयुक्तम् ?

(ii) 'राजा तु रक्षक: भवति' अस्मिन् वाक्ये क्रियापदं किम् ?

(iii) 'राजा तु रक्षक: भवति परं भवान् तु भक्षक:|' वाक्यात् अव्ययपदम् चिनुत-

15 रेखांकित-पदानि आधृत्य प्रश्ननिर्माणम् कुरुत- (केवलं प्रश्नचतुष्टयम्) 1X4=4

(i) **<u>विद्वांस:</u>** एव लोकेऽस्मिन् चक्षुष्मन्तः प्रकीर्तिताः।

(ii) त्वं **<u>मानुषात्</u>** विभेषि ।

(iii) **<u>बुद्धे:</u>** वैशिष्ट्यम् इत्यादीन् विषयान् प्रकाशयति |

(iv) चातक: **<u>वने</u>** वसति |

(v) दैवगति: **<u>विचित्रा</u>** भवति |

16 मञ्जूषात: समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयित्वा पुन: लिखत- 1X4=4

श्लोक: -संपतौ च विपतौ च महतामेकरूपता **|**

उदये सविता रक्तो रक्तश्चास्तसमये तथा ||

**अन्वय:-** (i) ----------- संपतौ विपतौ च (ii) ------------- भवति | यथा (iii) -------

उदये रक्त: भवति , तथा एव (iv) ------------ च रक्त: भवति ||

**मञ्जूषा- [** अस्तसमये , एकरूपता , सविता , महताम् **]**

अथवा

मञ्जूषाया: साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुन: लिखत-

पिता यच्छति पुत्राय बाल्ये विद्याधनं महत् ।

अस्य पिता किं तपस्तेपे इत्युक्तिः तत्कृतज्ञता ।।

**भावार्थः -** जनकः शैशवे i)---------------बहुमुल्यं विद्यारुपि धनं ददाति, येन बालकस्य विद्वत्तां दृष्ट्वा ii)--------------- यदा कथयन्ति यत्"अस्य विदुषः जनकः कीदृशं तपः कृतवान् ?" अर्थात् अस्य पिता) iii)---------------तपस्वी वर्तते, इति कथनमेवपितरंप्रति कृतज्ञता वर्तते । )iv) ---------- विद्याधनमेव सर्वधनप्रधानमस्ति ।

**मञ्जूषा:- [** महान्, जनाः, सुताय, वस्तुतः **]**

17 अधोलिखित-कथांशं समुचित-क्रमेण लिखत- 1/2x8=4

(i) कथम् एकैकशः व्याघ्रभक्षणाय कलहं कुरुथः ?

(ii) कश्चित् धूर्तः शृगालः हसन् अवदत् ।

(iii) त्वं मानुषादपि बिभेषि ।

(iv) तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता ।

(v) तौ एव विभज्य भुज्यताम् ।

(vi) व्याघ्रः भयाकुलचित्तो नष्टः ।

(vii) बुद्धिमती व्याघ्रजाद् भयात् पुनरपि मक्ताऽभवत् ।

(viii) भवान् कुतः भयात् पलायितः?

18 अधोलिखितवाक्येषु रेखांकितपदानां प्रसंगानुकूलम् उचितार्थं चित्वा लिखत-(केवलं प्रश्नत्रयम् ) 1x3=3

(i) नराणां प्रथम :**<u>शत्रु:</u>** आलस्यम् अस्ति | :रिपु ] , मित्रम् , मानव[ :

(ii) पिको वसन्तस्य गुणं न **<u>वायस:</u>** | [ कुक्कुरः , शृगाल: , काक: ]

(iii) फलच्छायासमन्वित :**<u>वृक्ष:</u>** सेवितव्य :| [छाया , तरु :, मानव:]

(iv) **<u>अनृतं</u>** वदसि चेत् काक दशेत् :| सत्यम् ], असत्यम् , शनै[ :

***********